National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 200-202
© 2025 NJHSR
www.sanskritarticle.com

**डॉ सोमकृष्ण**
अतिथि प्राध्यापक,
भारतीय पंथ मत संप्रदाय एवं सहमेटिक-धर्म अध्ययन केंद्र, (Hindu studies)
हिमाचल प्रदेश केंद्रीय विश्वविद्यालय, धर्मशाला

**Correspondence:**
**डॉ सोमकृष्ण**
अतिथि प्राध्यापक,
भारतीय पंथ मत संप्रदाय एवं सहमेटिक-धर्म अध्ययन केंद्र, (Hindu studies)
हिमाचल प्रदेश केंद्रीय विश्वविद्यालय, धर्मशाला

# शिवतत्वविमर्शः

**डॉ सोमकृष्ण**

भारतीयसंस्कृतेराधारः वेदाः सन्ति। वेदा अपौरुषेया मताः। वेदस्य प्रत्येकं मन्त्रेषु मानवजीवनस्य कल्याणम्, आध्यात्मिकोन्नतिः, ब्रह्मज्ञानम् इत्यादीनां सन्देशः प्रदत्तोऽस्ति। वेदेषु शिवतत्वस्य व्यापकरूपेण वर्णनं प्राप्यते। शिवशब्दस्य मूलोऽर्थोऽस्ति- कल्याणम्, मङ्गलम्, शुद्धचैतन्यम् इत्यादयः। अतो यदा वयं शिवतत्वस्य चर्चां कुर्मः तदा तस्याशयः केवलम् एकस्यां देवतायां सीमितो न भूत्वा समस्तब्रह्माण्डे व्याप्तं तत् परमकल्याणकारि तत्वं भवति यस्यानुभूतिः वेदेषु ऋषिभिः कृतास्ति। वेदेषु शिवस्य वर्णनं प्रत्यक्षनाम्नापि प्राप्यते सहैव रुद्रः, महादेवः, भवः, ईशानः आदिभिः विविधैः नामभिरपि महत्त्वपूर्णं वर्णनं प्राप्यते। ऋग्वेदे रुद्राय गौणस्थानं प्रदत्तम्।

## शिवतत्वस्य परिभाषा

**शिव** इति शब्दः द्विधा व्युत्पद्यते। आदादिकात् **शीङ् स्वप्ने** इति धातोस्तथा **शोऽवखण्डने** इति दैवादिकाद्धातोः। आदादिकात् **शेते इति शिवः** इति व्युत्पत्तिर्भवत्यर्थात् यः शयनं करोति स शिवः। दैवादिकात् **श्यति नाशयत्युपासकपापान् इति शिवः** इति विग्रहो भवति।

वेदेषु शिवस्य विवेचनां यत्र तत्र प्राप्तुं शक्नुमः। शिव एक एवास्ति  न द्वितीयः। यः सर्वं चराचरं जगत् ईशते। उक्तं च-

> **एको हि रुद्रो न द्वितीयाय तस्थुर्य इमांल्लोकानीशत ईशनीभिः।**
> **प्रत्यङ् जनांस्तिष्ठति संचुकोचान्तकाले संसृज्य विश्वा भुवनानि गोपाः।।**[1] इति।।

शिवतत्वस्याशयः तया परमसत्तयास्ति या सृष्टेः मूलास्ति। यत् सर्वव्यापि, सर्वशक्तिमत्, कल्याणकारि चास्ति। शिव इति पदस्यार्थोऽस्ति- मङ्गलम्, शान्तिः, कल्याणम्, आनन्दः इत्यादि। वेदेषु यस्य ब्रह्मण उल्लेखोऽस्ति स एव शिवतत्त्वमस्ति। कथितश्चास्ति-

**शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा शन्न इन्द्रो बृहस्पतिः।** अत्र शम् इति पदस्यार्थः शिवम् इत्यर्थात् मङ्गलम्, कल्याणमस्ति, यत् शिवस्य मूलस्वरूपमस्ति।

## शिवस्य स्वरूपम्

वेदेषु शिवस्य शारीरिकविशेषतानामप्युल्लेखः प्राप्यते। कथितमस्ति यदस्य हस्तावन्ये चावयवाः दृढाः संहताश्च सन्ति। **बाहुभ्यामुत ते नमः।।**[2] **स्थिरेभिरङ्गैः पुरुरूप उग्रः बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः।।**[3] इति। अस्योदरं नीलं तथा पृष्ठं रक्तमस्ति।[4] अस्य कण्ठोऽपि नीलः।[5] अस्य शरीरमत्यन्तं बलिष्ठं विद्यते। ओष्ठौ सुन्दरौ स्तः। मस्तके केशानां जटा वर्तते। अतोऽस्य नाम कपर्दी जातः। शिवस्यानेकानि रूपाणि सन्ति। अस्याङ्गानि स्वर्ण इव हेवावन्ति सन्तीति रुद्रसूक्ते कथितं प्राप्यते। अस्य मुखम्, अक्षिणी, त्वक्, उदरम्, जिह्वा, दन्ताः इत्यादीनां वर्णनं कृतमस्ति-

> **मुखाय ते पशुपते यानि चक्षूंषि ते भव त्वचे रूपाय संदृशे प्रतीचीनाय ते नमः।।**
> **अस्त्रनीलशिखण्डेन सहस्राक्षेण वाजिना। रुद्रेणार्धकघातिनी तेन मा समरामहि।।**[6]

अस्य सर्वतः नेत्राणि सन्ति, सर्वतः मुखानि सन्ति, सर्वतः भुजाः सन्ति, सर्वतः पादाः सन्ति। सः जगत् विरच्य प्राणिनः पादवतः पक्षवतश्च करोति। उक्तश्च-

**विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।**
**सं बाहुभ्यां धमति संपत्तैर्द्यावाभूमि जनयन्देव एकः।।**[7]

अग्निः शिवस्यैव स्वरूपमस्ति। अग्निना सह तद्रूपितासु देवतासु रुद्रोऽप्येको विद्यते। अग्निना सह रुद्रस्य ताद्रूप्यं वेदेषु ब्राह्मणेषु च प्राप्यते। **त्वमग्ने रुद्रो असुरो महो दिवः।**[8]

**तस्मै रुद्राय नमोऽस्त्वग्नये।।**[9] **अग्निर्वै रुद्रः।।**[10] **अत्रैव सर्वोऽग्निः संस्कृतः स एषोऽत्र रुद्रो देवता।।**[11] इति। भवः शर्वः इत्येतौ रुद्रस्य पुत्रत्वेन कथितौ। एतयोः तुलना घातकवृकेण कृतास्ति।

**यावारण्ये पतयतो वृकौ जजभताविव।**
**महादेवस्य पुत्राभ्यां भवशर्वाभ्यां नमः।।**[12]

शिवः विश्वस्य पालनहारः आरोग्यदाता च कथितोऽस्ति। शिवः भूतम्, भविष्यत्, वर्तमानं च सर्वेषामाधारः कथितः। शिवः पर्वतवासी वर्तते। अतः अस्य नामानि गिरीश, गिरिशन्त, गिरित्र इत्यादीनि सन्ति। **यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्।।**[13]

वेदेषु शिवः ब्रह्मण एव द्वितीयंरूपः कथितः। **शिवो भूत्वा शिवं करोति** अर्थात् शिवः स्वयं कल्याणमयोऽस्ति सः प्राणिभ्यः कल्याणं प्रयच्छति। श्वेताश्वतरोपनिषदि कथितमस्ति- शिवः संहारकत्वेनापि प्रथितोऽस्ति। किन्तु स एव रुद्रः जीवेभ्य आयुः, बलम्, स्वास्थ्यं च प्रददाति। अतः शिवेन द्वारा जगत् न केवलं संह्रियतेऽपि तु जगतः सन्तुलनमपि क्रियते। ऋग्वेदेऽथर्ववेदे च शिव औषधीनां स्वामी चिकित्सकश्च कथितः। **शं नो रुद्रः शं नस्त्वा नमोऽस्तु तेऽस्तु।** एतत् प्रदर्शयति यत् शिवतत्वं केवलमाध्यात्मिकमेव नापि तु स्वास्थ्येन कल्याणेन चापि सम्बद्धमस्ति।

शिवः पर्वताः, नद्यः, वनानि, इत्येतेभ्योऽप्यभिन्नः दृष्टोऽस्ति। अथर्ववेदे वनस्पतीनां पर्वतानां चाधिपतिः कथितः। रुद्स्य निवासः हिमालय उक्तः। यत् शिवस्य प्रकृतिनिष्ठतां स्पष्टयति। वेदेषु प्रत्यक्षरूपेण योगस्याधारः स्थापितः। तत्र शिवः योगेश्वरः मतः। **युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य ब्रह्मविदो जनासः।।**[14] इति। शिवः केवलं देवता नापि तु समस्तस्य ब्रह्माण्डस्य प्रतीकभूतोऽस्ति। **नमः शिवाय शिवतराय च।**[15]

वेदेषु शिवतत्त्वस्य वर्णनं गहनदार्शनिकेनाध्यात्मिकेन च दृष्टिकोणेन कृतमस्ति। शिवः केवलं संहारकदेवता एव नास्ति किन्तु सम्पूर्णजगतः कल्याणकारितत्वमस्ति।

### शिवतत्त्वमेव ब्रह्म नान्यत्

**यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो रुद्रो महर्षिः।**[16] अर्थात् शिव एव सम्पूर्णदेवतानामाधारः नियन्ता स्वामी च वर्तत इति। शिव एव हिरण्यगर्भं जनयामास। हिरण्यगर्भात् परं स एव ब्रह्मास्ति। सः सर्वेषु प्राणिषु निगूढोऽस्ति। स एव सम्पूर्णजगत ईशः।

**ततः परं ब्रह्मपरं बृहन्तं यथानिकायं सर्वभूतेषु गूढम्।**
**विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वामृता भवन्ति।।**[17] इति।

शिवात् परं नास्ति, तस्मात् अणीयः ज्यायश्च नास्ति। तेन सर्वमपि जगत व्याप्तमस्ति। स एव सर्वेषां स्वामी वर्तते। सः स्वस्य द्योतनात्मकमहम्नि वृक्ष इव निश्चलभावेन स्थितोऽस्ति।

**यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।**
**वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्।।**[18]

### शिवस्य कार्यम्

शिव एव सकलमिदं स्वस्य मायया रचयति। स एव नियन्तास्ति। तेनानुप्राणिता एव प्राणिनः जीवन्ति। जगतोऽस्य शासनं करोत्यतः ईशः कथितः।[19] स्वसाम्राज्यस्य मानवजातीनां शुभाशुभं पश्यति। सरितः पृथ्व्यां प्रवाहयति। **प्र रुद्रेण ययिना यन्ति सिन्धवस्तिरो महीमरमतिं दधन्विरे। येभिः परिज्मा परियन्नुरु जयो वि रोरुवज्जठरे विश्वमुक्षते।।**[20] शिवः कामानां पूरकोऽस्ति। सः प्रदीप्तान्नादिकं प्रयच्छति। शिवः कल्याणकारी वर्तते।।[21]

शिवस्य पार्श्वे रोगनिवारिणी शक्तिः वर्तते। सा औषधं यच्छति।[22] शिवः औषधीनां शासकोऽस्ति। सहस्रमौषधान् रक्षति। शिवस्योपासकाः तेन औषधेन शतं वर्षान् जीवनस्य कामनां कुर्वन्ति।[23] शिवः स्वोपासकानां परिवारान् निर्व्याधान् करोति तथा पशूनां प्रत्यपि प्रसन्नस्तिष्ठति। शिवस्य द्वे विशेषणे स्तः- जलाषः, जलाषभेषजश्चेति। **गाथपतिं मेधपतिं रुद्रं जलाषभेषजम्। तच्छंयोः सुम्नमीमहे।।**[24] भगवान् शिवः उपचारक आसीत्। प्रथमः वैद्यः स एव।[25]

सम्पूर्णजगतः स्वामी अयं देहाभिमानी भूत्वा नवद्वारवति शरीरे विषयाणां ग्रहणाय चेष्टते।[26]

### शोधसारांशः

भयङ्कराभयङ्कररूपेण रुद्रस्योल्लेखं संहितासु प्राप्नुमः। यः रुद्रः स एव शिवः। वृत्रस्यावरोधं त्रोटितुं मेघाच्छन्नाकाशे यस्य गर्जनात् वर्षायाः सङ्केतः प्राप्यते, स एव वर्षायाः पश्चात् निर्धौतनिर्मलाकाशे प्रसन्नभूमिकायां दृश्यते।

अज्ञाननिवृत्तिरेव शिवप्राप्तिरिति कथिता। ज्ञाने प्राप्तेऽज्ञाननिवृत्तिः जायते। भगवतः माया एव ज्ञानस्याच्छादनं करोति। यदि सा माया निवृत्ता चेत् जनः यथायथं पश्यति जानाति च। कथितं च-

**सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम्।**
**विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमाप्नोति।।**[27] इति।

प्रायसः शास्त्रेषु भगवत्प्राप्तेरुपायः ज्ञानमित्येव कथितं प्राप्यते। अतः ज्ञानयोगेऽभ्यासः कर्तव्यः। अभ्यासेन वैराग्येण च मनः एकाग्रीकृत्य ज्ञानप्राप्तिः क्रियते। शिवं ज्ञात्वा जनः मृत्युपाशान् छिनत्ति।[28] अयं शिवः सर्वेषां हृदि स्थितोऽस्ति इति यःजानात्यनुभवति च स अमरो भवति।[29]

सद्विवेकी पटुः प्राणी शास्त्रोक्तविधिना शिवं ज्ञात्वैतस्मात् दुःखालयात् भवात् संसारात् मुक्तिं पाप्य पुरुषार्थं करोति।

**कूटाङ्कः-**

शिवः, रुद्रः, ब्रह्म, ज्ञानम्, अज्ञानम्, मोक्षः, महादेवः, भवः, ईशानः।

**सन्दर्भग्रन्थसूची**


1. श्वेताश्वतरोपनिषद्, गीताप्रेस गोरखपुर, वि.सं. 2080
2. ऋग्वेदः, परोपकारिणी सभा, अजमेर, 1990
3. यजुर्वेदः, शर्मा, पं. जयदेवजी, श्रीदुर्गा प्रिंटिंग प्रेस, अजमेर, 1988
4. सामवेदः, शर्मा, पं. जयदेवजी, श्रीदुर्गा प्रिंटिंग प्रेस, अजमेर, 1988
5. अथर्ववेदः, आचार्य, श्रीरामशर्मा, शान्तिकुञ्ज, हरिद्वार, 2002
6. शतपथब्राह्मणम्, सम्पादक- विद्यालंकार, पं बुद्धदेव, समर्पण शोधसंस्थान, गाजियाबाद, 1990


1 श्वेताश्वतरोपनिषद् 3.2

2 शुक्लयजुर्वेदः 16.1

3 ऋग्वेदः2.33.9

4 नीलमस्योदरं लोहितं पृष्ठम्।। (अथर्ववेदः 15.1.7)

5 असौ योऽवसर्पति नीलग्रीवो विलोहितः।। (यजुर्वेदः 16.7)

6 अथर्ववेदः 11.2.5

7 श्वेताश्वतरोपनिषद् 3.3

8 ऋग्वेदः 2.1.6

9 अथर्ववेदः 7.87.1

10 शतपथब्राह्मणम् 6.1.3.10

11 शतपथब्राह्मणम् 9.1.1.1

12 शाङ्खायनश्रौतसूत्रम् 4.20.1

13 यजुर्वेदः 16.

14 श्वेताश्वतरोपनिषद् 2.4

15 यजुर्वेदः 16.

16 श्वेताश्वतरोपनिषद्3.4

17 श्वेताश्वतरोपनिषद् 3.7

18 श्वेताश्वतरोपनिषद् 3.9

19 य एको जालवानीशत ईशनीभिः सर्वांल्लोकानीशत ईशनीभिः। य एवैक उद्भवे सम्भवे च य एतद्विदुरमृतास्ते भवन्ति। (श्वेताश्वतरोपनिषद् 31)

20 ऋग्वेदः 10.92.5

21 स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन।
येभिः शिवः स्ववां एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः।।
(ऋग्वेदः 10.92.9)

22 स्तुतस्त्वं भेषजं रास्यस्मे। (ऋग्वेदः 2.33.12)

23 त्वादत्तेभी रुद्र शतमेभिः शतं हिमा अशीय भेषजेभिः।।
(ऋग्वेदः 2.33.2)

24 ऋग्वेदः 1.43.4

25 अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। (यजुर्वेदः 16.5)

26 नवद्वारे पुरे देही हंसो लेलायते बहिः।
वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च।। (श्वेताश्वतरोपनिषद् 3.18)

27 श्वेताश्वतरोपनिषद् 4.14

28 तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति।। (श्वेताश्वतरोपनिषद् 4.15)

29 एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये सन्निविष्टः।
हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति॥
(श्वेताश्वतरोपनिषद् 4.17)